# Shivapujanamahima

# શિવપૂજનમહિમા

## Document Information

Text title : Shivapujanamahima

File name : shivapUjanamahimA.itx

Category : shiva, shivarahasya, pUjA

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shivarahasyam | harAkhyaH tRitIyAMshaH | uttarArdham | adhyAyaH 1 | 17-51 ||

Latest update : January 30, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 1, 2024

*sanskritdocuments.org*

# શિવપૂજનમહિમા

શિવપૂજનમુત્કૃષ્ટં સર્વસિદ્ધિપ્રદાયકમ્ ।
તદેવ ન કૃતં તસ્ય જન્મ તાવન્નિરર્થકમ્ ॥ ૧૭॥

શિવપ્રસાદલબ્ધાનિ ધનધાન્યાદિકાન્યતઃ ।
તૈરર્ચનં મહેશસ્ય કૃત્વા મુક્તિમવાપ્નુયાત્ ॥ ૧૮॥

તદીયમેવ દત્વાપિ તસ્મૈ ભાગ્યમનુત્તમમ્ ।
પ્રાપ્યમિત્યેવ યત્નેન કર્તવ્યં શિવપૂજનમ્ ॥ ૧૯॥

વિના ન પુણ્યપુઞ્જેન ભક્તિર્મૃત્યુઞ્જયાર્ચને ।
અતઃ પુણ્યાત્મના નિત્યં કર્તવ્યં શિવપૂજનમ્ ॥ ૨૦॥

શિવાર્ચનેન વિજ્ઞેયઃ પુણ્યવાનિતિ માનવઃ ।
તદભાવેન વિજ્ઞેયો મહાપાતકવાનિતિ ॥ ૨૧॥

અતઃ સ દૂરતસ્ત્યાજ્યો યો નાર્ચયતિ શઙ્કરમ્ ।
તત્સંયોગાભિલાપાદ્યૈર્માનવઃ પાપવાન્ ભવેત્ ॥ ૨૨॥

યેન કેનાપિ રૂપેણ શરીરં પ્રાપ્ય માનવઃ ।
શિવાર્ચનપરો ભૂયાત્ સ ભૂયઃ પુણ્યવાન્ ભવેત્ ॥ ૨૩॥

શિવાર્ચનપરો મર્ત્યઃ પ્રણતઃ સંસ્તુતઃ સ્મૃતઃ ।
હરત્યઘાન્યનન્તાનિ ઘોરાણિ વિવિધાન્યપિ ॥ ૨૪॥

ઘોરપાપવનસ્યાયં કુઠારઃ શઙ્કરાર્ચકઃ ।
અતઃ સર્વપ્રયત્નૈશ્ચ કર્તવ્યં શિવપૂજનમ્ ॥ ૨૫॥

અતઃ પરં ત્વયોન્માદઃ પરિત્યાજ્યઃ પ્રયત્નતઃ ।
શિવપૂજાં કુરુ પ્રીત્યા તવ મુક્તિર્ભવિષ્યતિ ॥ ૨૬॥

શરીરં શિવપૂજાયૈ યૌવને દક્ષમિત્યતઃ ।
પ્રયત્નેન મહાદેવં પૂજયસ્વ યથોચિતમ્ ॥ ૨૭॥

સ્નાનં કુરુ પ્રયત્નેન શિવકુણ્ડે શિવોદકે ।
ઉદ્ધૂલ્ય ભસ્મનાઙ્ગાનિ ત્રિપુણ્ડ્ર ચ પ્રયત્નતઃ ॥ ૨૮॥

શિરોલલાટવક્ષઃસુ સ્કન્ધે ચ મણિબન્ધને ।
કૂર્પરે નાભિદેશેચ પાર્શ્વયોર્ગણ્ડમણ્ડલે ॥ ૨૯॥

ઊરુપ્રદેશે ગુલ્ફેચ ત્રિપુણ્ડ્રં ધારયેન્મુહુઃ ।
રુદ્રાક્ષધારણં કાર્યં દ્વાત્રિંશત્ કણ્ઠમાલયા ॥ ૩૦॥

શિખાયામેકમેવ સ્યાત્ દ્વિચત્વારિંશદુત્તમાઃ ।
રુદ્રાક્ષાઃ શિરસા ધાર્યાઃ કર્ણયોર્દ્વાદશ દ્વયોઃ ॥ ૩૧॥

શતત્રયં તૂપવીતે બાહ્વોઃ ષોડશ ષોડશ ।
ચતુર્વિંશતિ રુદ્રાક્ષાઃ દ્વયોસ્તુ મણિબન્ધયોઃ ॥ ૩૨॥

અષ્ટોત્તરશતૈરેવ રુદ્રાક્ષૈર્જપમાલિકા ।
તયા પઞ્ચાક્ષરં જપ્ત્વા શૈવઃ શિવમવાપ્નુયાત્ ॥ ૩૩॥

ત્રિભિરાચમનં સ્ત્રીણાં પુંસામિવ યથાવિધિ ।
ભવાદ્યૈર્નામભિર્યદ્વા શિવપઞ્ચાક્ષરેણ વા ॥ ૩૪॥

પશ્ચાત્ કુશાસને સ્થિત્વા યદ્વા વ્યાઘ્રાજિનાદિષુ ।
ઉદઙ્મુખઃ પ્રાઙ્મુખો વા પૂજયેદ્ગિરિજાપતિમ્ ॥ ૩૫॥

પઞ્ચામૃતાભિષેકાદ્યૈઃ કર્પૂરાદિસમન્વિતૈઃ ।
જલૈઃ ફલોદકૈરીશં આમ્રાદિકરસૈરપિ ॥ ૩૬॥

શુદ્ધોદકૈઃ કવોષ્ણૈર્વા શીતલૈર્વા મનોહરૈઃ ।
પશ્ચાત્ દુકૂલવસનૈઃ પૂજયિત્વા સદાશિવમ્ ॥ ૩૭॥

સુગન્ધચન્દનેનાપિ પૂજયેદ્ગિરિજાપતિમ્ ।
બિલ્વપત્રૈરક્ષતૈશ્ચ પ્રફુલ્લકુસુમૈરપિ ॥ ૩૮॥

મન્દારાદિપ્રસૂનાનાં માલિકાભિઃ સમર્ચયેત્ ।
પશ્ચાદ્ધૂપય ધૂપૈશ્ચ દીપૈઃ કર્પૂરસમ્ભવૈઃ ॥ ૩૯॥

ઓદનૈરાજ્યસંયુક્તૈઃ શાકસૂપસમન્વિતૈઃ ।
પરમાન્નૈર્ઘૃતયુતૈઃ શર્કરારાશિસંયુતૈઃ ॥ ૪૦॥

લડ્ડુકૈર્વટુકૈરાજ્યૈઃ અપૂપૈર્મણ્ડકાદિભિઃ ।
ભક્ષ્યૈર્લેહ્યૈશ્ચ ચોષ્યૈશ્ચ પેયૈશ્ચ વિવિધૈરપિ ॥ ૪૧॥

કદલીનારિકેલાદ્યૈઃ અપારૈઃ ફલમણ્ડલૈઃ ।
ઇક્ષુદણ્ડૈશ્ચ મણ્ડૈશ્ચ દધિક્ષીરરસોદ્ભવૈઃ ॥ ૪૨॥

દધ્યોદનૈશ્ચ ક્ષીરૈશ્ચ દધિર્પૂરૈર્મનોરમૈઃ ।
સુગન્ધજલપૂરૈશ્ચ નવેક્ષુરસપૂરકૈઃ ॥ ૪૩॥

દ્રાક્ષારાશિરસૈરેતા લવઙ્ગપરિવેષ્ટિતૈઃ ।
અન્યૈરપિ રસદ્રવ્યૈઃ પૂજયિત્વા મહેશ્વરમ્ ॥ ૪૪॥

પશ્ચાદાભરણં દદ્યાત્ રત્નરાશિવિરાજિતમ્ ।
પુનર્વસ્ત્રાણિ રમ્યાણિ રત્નછત્રાદિકં તથા ॥ ૪૫॥

દર્પણં ચારુ વ્યજનં ચામીકરવિરાજિતમ્ ।
ચામરં પુષ્પમાલાશ્ચ પતાકાશ્ચ મનોહરાઃ ॥ ૪૬॥

દેયં કર્પૂરદીપાનાં નીરાજનમનુત્તમમ્ ।
પશ્ચાદાસ્વેદમીશાય પ્રણતો નર્તનોત્સવૈઃ ॥ ૪૭॥

રુદ્રાધ્યાયાદિમન્ત્રાણાં સ્તોત્રૈઃ શામ્ભવશોભનૈઃ ।
પુણ્યૈઃ શિવકથાલાપૈઃ કાલો નેયઃ પ્રયત્નતઃ ॥ ૪૮॥

એવમાસાયમીશાર્ચા કર્તવ્યા મુક્તિકાઙ્ક્ષિભિઃ ।
સાયઙ્કાલે વિશેષેણ પુનઃ પૂજાં સમારભેત્ ॥ ૪૯॥

ઉક્તૈનૈવ પ્રકારેણ મોક્ષદં શિવપૂજનમ્ ।
લિઙ્ગરૂપિણમીશાનં પ્રદોષે યસ્તુ પશ્યતિ ॥ ૫૦॥

સ વંશકોટિસંયુક્તઃ શિવલોકં પ્રયચ્છતિ ।
બ્રહ્મહત્યાદિપાપાનાં પ્રલયાય પ્રજાયતે ॥ ૫૧॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે શિવપૂજનમહિમા સમ્પૂર્ણા ॥

- ॥ શ્રીશિવરહસ્યમ્ । હરાખ્યઃ તૃતીયાંશઃ । ઉત્તરાર્ધમ્ । અધ્યાયઃ ૧ -
યાજ્ઞવલ્ક્યજનકસંવાદે રાજપુત્રેણ રાજપત્ન્યુપદેશવર્ણનમ્ । ૧૭-૫૧॥

- .. shrIshivarahasyam . harAkhyaH tRRitIyAMshaH . uttarArdham . adhyAyaH 1 -
yAjnavalkyajanakasaMvAde rAjaputreNa rAjapatnyupadeshavarNanam . 17-51..

Proofread by Ruma Dewan

*Shivapujanamahima*

pdf was typeset on February 1, 2024

Please send corrections to *sanskrit@cheerful.com*